विना दानानधिकारः BālamBha. ii. 132. 26 (*on* 2.113)

अनुज्ञासंबन्ध (anujñā-sambandha) *m.* connection with consent or permission (चतुर्थकालमश्नीयादक्षारलवणं मितम्) स्थिते विशेषणसमासे विशिष्टस्यार्थस्य नानुज्ञासंबन्धः ManuBh. ii. 403.21 (*on* 11. 108)

अनुज्ञासामर्थ्य (anujñā-sāmarthya) *n.* strength of permission अनुज्ञासामर्थ्याच्च प्रार्थनापि पूर्वं कर्तव्या ManvaMu. 128. 21 (*on* 3. 210)

अनुज्ञास्यमानत्व (anujñāsyamāna-tva) *n* the state of being that which will be permitted परार्थानुमाने बोध्यानुरोधादापत्रादिकस्योदाहरणस्यानुज्ञास्यमानत्वात् PramāMī. 48.13 (*on* i. 2. 20)

अनुज्ञेच्छावाचिन् (anujñecchāvāc-in) *adj.* expressing the desire of permission अनुज्ञेच्छावाची यो ननुस्तद्योगे तिङ् नानुदात्तम् Prasā. ii. 787.8.

अनुज्ञेय (anu-jñeya) *adj.* to be accepted यथा वक्तुरभिप्रायस्तथा शब्दार्थावनुज्ञेयौ प्रतिषेध्यौ वा, न छन्दतः NyāyBh. 70.4 (*on* i. 2. 14); अयं च वाच्यवाचकभावलक्षणः संबन्धः स्वाभाविकशब्दार्थसंबन्धवादिनाप्यनुज्ञेयः NyāyVār. 266.5 (*on* ii. 1. 51); सामान्यवचनेनाहवनीयगोचरेणोल्यधारणस्याप्राप्तेस्तत्प्रापकं वचनमवश्यमनुज्ञेयम् MayūMāli. 881.11 (*on* xii. 4. 10)

अनुज्ञैकरस (anujñaika-rasa) *adj.* having the sole character of direction अनुज्ञैकरसो ह्ययमात्मा चिद्रूप एव NṛsimhoTāU. 2.

अनुज्ञैषणा (anujñaiṣaṇā) *f.* the seeking of or request for permission नन्वित्यनुज्ञैषणायाम् P. viii. 1.43; अनुज्ञाया एषणा प्रार्थना, अनुज्ञैषणा KāśiVṛ. *on* viii. 1.43.

अनुज्येष्ठ (anu-jyeṣṭha) *adj.* [P. vi. 2. 189; AltGr. II. 1.308] **I** who has followed the eldest one or the seniormost, next to the eldest अथ यूपस्य छेदने वक्ष्यामः ... यद्यग्निष्ठा विच्छिद्येत प्रमायुको यजमानः ... यदि दक्षिणा ज्येष्ठः पुत्रो यद्युत्तगानुज्येष्ठः MānŚS. 177. 14; ज्येष्ठः सुतस्ते कतमः कतमस्तदनन्तरः (v. l. तथानुज्येष्ठ एव च) MahāBhā. i. 224. 22; अनुगतो ज्येष्ठमनुज्येष्ठः KāśiVṛ. *on* vi. 2.189; **II** the eldest one who is followed (अनोरप्रधानकनीयसी) अप्रधानकनीयसी इति किम्। अनुगतो ज्येष्ठोऽनुज्येष्ठः KāśiVṛ. *on* vi. 2.189; अनुज्येष्ठः ... उत्तरपदार्थप्रधानोऽयम् । तेन प्रधानवाचित्वं ज्येष्ठशब्दस्यास्ति Nyās. ii. 420छ.8 (*on* vi. 2.189)

अनुज्येष्ठक (anujyeṣṭha-ka) *m.* name of a class of creatures produced by the female (called) Mātṛ ग्राहाश्चतुर्विधा ज्ञेया तथानुज्येष्ठका अपि। निष्कांश्च शिशुमारांश्च माता व्यजनयत्प्रजाः VāyuP. ii. 8. 287.

अनुज्येष्ठतपस्विन् (anujyeṣṭha-tapasvin) *m.* ascetic in the order of seniority स विद्याधरकुञ्जरः ।... अभिवाद्य ... काश्यपप्रमुखान्मुनीन् ।... ववन्दे मातुलं मुनिम् । भर्तारमनुयान्तीभिरनुज्येष्ठतपस्विनः । देवीभिर्वन्दिताः BṛKathāŚloSam. 3. 107.

अनुज्येष्ठपत्नी (anujyeṣṭha-patnī) *f.* wife next to the eldest one, younger wife ज्येष्ठानुज्येष्ठपत्नीनां भ्रातृणां पुत्रनप्तृणाम् । निग्रहानुग्रहौ पार्थ गार्हस्थ्यमिति तत्तपः MahāBhā. xii. 66.17.

अनुज्येष्ठम् (anujyeṣṭhám) *adv.* in accordance with seniority गवां गृहाणां रसम् ओषधीनाम् अनुज्येष्ठं वर्चे आयुर् विकल्पयः । मा मा ? हिंसिषुः पितरो वर्धमानाः AV.(P.) ii. 23.1; यं कामयेतानुज्येष्ठं प्रजया ऋध्नुयादिति तस्य पूर्णमङ्ग्या उन्नयेत् MaiS. i. 8. 4 (i. 119. 18); VārāŚS. I. v. 2.24; अनुज्येष्ठमेवास्य पुत्रा ऋध्नुवन्ति KāṭhS. 6. 4 (i. 52.17); KapiKaS. 4.3 (40.6); अग्निय-मग्नियं पूर्णतमं योऽनुज्येष्ठमृद्धिमिच्छेत् पुत्राणाम् ĀśvaŚS. I. ii. 3. 13; अनुज्येष्ठं च ते तत्र युधिष्ठिरपुरोगमाः। चक्रुरस्त्रं महावीर्याः कुमाराः परमाद्भुतम् MahāBhā. i. 124. 22; अनुज्येष्ठं प्रविशन्तु भवन्तः । ज्येष्ठानुक्रमेणेत्यर्थः JaineVyā. 47. 31 (*on* i. 3. 5); KātanVṛ. *on* ii. 5.14; आनुपूर्व्ये, यथावृद्धम्, अनुज्येष्ठम् CāndraVṛ. *on* ii. 2. 2; अनुज्येष्ठं प्रविशन्तु भवन्तः। ज्येष्ठानुपूर्व्या भवन्तः प्रविशन्त्वित्यर्थः KāśiVṛ. *on* ii. 1.6; अनन्तरमनुज्येष्ठं देवीः संमान्य भूपतिः । वासुकिन्या महादेव्या निनाय सह यामिनीम् BṛKathāŚloSam. 2.20; 18. 596; नानुज्येष्ठमयुध्यन्तेति मूलराजमिच्छवः (नृपाः) DvyāśraKā. 5.41; द्राषष्टिरन्येऽपि शक्राश्चक्रुर्जगत्पतेः। स्नात्राङ्गरागौ पूजां चानुज्येष्ठं सोदरा इव TriṣaŚaPuC. i. 2.572; मोक्षप्राप्तमिवात्मानं मन्यमाना महामनाः। अनुज्येष्ठं निषसाद सा मध्येव्रतिनीगणम् TriṣaŚaPuC. i. 4. 797; iii. 4.40; तत्तीरे सहकारस्य नल(व)पल्लवशालिनः। छायायामतिसान्द्रायां तेऽनुज्येष्ठमुपाविशन् PāṇḍaC. 10. 7; 10.453; MalliC. 4. 153; ज्येष्ठमनुक्रम्य अनुज्येष्ठम् MugdhaBo. 6. 61 (61.15); ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठम् SiddhāKau. 162B.1 (*on* ii. 4. 18); अनुज्येष्ठं कार्यं कृतम्, अनुज्येष्ठं प्रणमति LaŚabdeŚe. i. 534.1.

अनुज्योतिस् (anu-jyotis) *m.* epithet of Śiva (*lit.* prevaded by refulgence) स्वयंज्योतिरनुज्योतिरात्मज्योतिरचञ्चलः ... एवं नाम्नां सहस्रेण तुष्टाव वृषभध्वजम् LiṅgaP. i. 98. 93; SaurP. 41. 77.

अनुञ् (an-uñ) (Gr.) excluding the particle *u* accompanied by the indicatory sound *ñ* योऽचि वानुञि CāndraVyā. vi. 4.26 (comm. अवर्णात्परस्य रोरच्युवर्जिते यकारो वा भवति । कयास्ते, क आस्ते। अनुञीति किम् ? स उ आगतः); वानुञ्यात् ŚākaṭāVyā. i. 1. 155; अस्पष्टाववर्णात्त्वनुञि वा SiddhaHe. i. 3.25.

अनुड्डयनसामर्थ्य (an-uḍḍayanasāmarthya) *adj.* not having the capacity of flying अनुड्डयनसामर्थ्यः श्राम्यति कुक्करो यथा RājTa.(Ka.) 8. 2931.

अनुड्डीनसमाधिशून (anuḍḍīnasamādhi-śūna) *adj.* who has grown (in perfection) of uninterrupted concentration or meditation नृपः ... उड्डीनवद्विघ्नभयः स लग्नो ब्रह्मणि अनुड्डीनसमाधिशूनः DvyāśraKā. 10.52 (comm. अनुड्डीनोऽक्षीणो यः समाधिश्चित्तैकाग्र्यं तेन शूनो वृद्धोऽतिस्फीतसमाधिरित्यर्थः)

अनुतंस (anutaṁsa) *m.* name of a king, son of Samātaṁsa समातंसस्तु तत्सुतः ।... अनुतंसस्तदात्मजः BhaviP. 418A.14 (iii(1). 3. 30)

अनुतक्रम् (anutakram) *adv.* in the manner in which buttermilk is drunk afterwards मोदकः क्षौद्रयुतोऽनुतक्रं पाण्डुामये दूरगतेऽपि शस्तः SiddhYo. 8.6 (comm. अनुतक्रं तक्रानुपानम्)

अनुतक्ष् (anu-takṣ-) I. P. to create or procure for the help of उत वा यस्य वाजिनोऽनु विप्रमतक्षत ṚV. i. 86.3; अच्छिद्रा उशिजः पदानु तक्षुः TaiS. V. vi. 8.6; BaudhŚS. ii. 51.5; अच्छिद्रोशिजः कवयः पदानुतक्षिषुः KāṭhS. 40. 6 (iii. 139. 12); आज्यं शंसिष्यन् पिता मातरिश्वा ... उशिगसीयानुतक्षिषत् ... इति जपित्वा ŚāṅkhāŚS. vii. 9.1.

अनुतटतलस्थापित (anutaṭatala-sthāpita) *adj.* placed on the ground near the shore कुर्वाणानां सलिलविहृतिं घोषयोषाजनानामादाय द्रागनुतटतलस्थापितान्यंशुकानि HaṁsDū.(Vā.) 44.

अनुतटम् (anutaṭam) *adv.* **AI** on the slope (of the mountain) यदेतदस्यानुतटं विभाति वनम् ŚiśuVa. 4. 39 (comm. यस्याद्रेरनुतटं तटेषु); **AII** on or along the bank (of the river) (गङ्गायाः) पारं प्राप्तस्य मित्रं तं शङ्खदत्तमपश्यतः । अन्विष्यतश्चानुतटं तस्यास्तमगमद्रविः KathāSaSāg. xii. 7. 128; सोषुपीत्यहिगणोऽनुतटम् (यस्य वहस्य) DvyāśraKā. 8. 84; **AIII** along the shore (of the sea) तस्मिन्वने निवसतामनुतटमुल्लङ्घ्य धैर्यमर्यादाम् । अबलासु निर्ममानामासीदतिरागसिन्धुरुद्वेलः PārvaPa. 3. 7; धिग्धिगम्बुधिम् ... यस्याध्वगाः ... दीना विवर्तितदृशोऽनुतटं प्रयान्ति Subhāṣi. 869; अनुतटमनिशं महाबलो न यदि भवानिह नाथ तिष्ठति। जलधिरभिभवेदयम् तदा जगत् YātrāPra. 7. 3; **B** on each bank गतमनुतटं पङ्के पङ्के निवेशितमाननम् ... जलदमलिनां हंसेनाशां विलोक्य गमिष्यता SūktiMu. 15.14.

अनुतटरुह् (anutaṭa-ruh) *adj.* growing on or along the banks मन्दाकिन्याः ... मन्दाराणामनुतटरुहां छायया वारितोष्णाः ... संक्रीडन्ते ... यत्र कन्याः MeghDū. *7.

अनुतटि (anutaṭi) *adv.* along the banks स्वयम् अनुतटि यस्याः स्वादु संगृह्य तोयं पृथुलफलघटीभिः प्रांशवो नालिकेराः YātrāPra. 5.22.

अनुतन् (anu-tan-) VIII. U. **1** to extend along या हृदयमुपर्षन्त्यनुतन्वन्ति कीकसाः ।... निर्द्रवन्तु बहिर्बिलम् AV. ix. 8.14; AV.(P.) xvi. 75. 4; केनापो अन्वतनुत केनाहरकरोद्रुचे AV. x. 2.16; AV.(P.) xvi. 60. 9; तव जिन ततदेहरुचिशरवण चमररुहततिः सितविहगरुचिम् । इयमनुतनुते MahāP. 23.153; **2** to carry on, to continue असंपृक्तानौ तन्वोऽसा अनु मा तन्वच्छिन्नो दिव्यस्तन्तुर्मा मानुषश्छेदि MaiS. i. 4.2 (i. 49.2); ज्योतिषे तन्तव आशिषमाशास्तेऽसा अनु मा तनु KāṭhS. 7.2 (i. 64.18); KapiKaS. 5.2 (51. 9); ĀpaŚS. iv. 16.4; MānŚS. 28.8; VārāŚS. I. i. 4.28; HirŚS. vi. 4.29 (521.14); vi. 6. 20 (538. 6); ततोऽसि तन्तुरस्यनु मा तनुहि VājaS.(K.) 2.52; KātyŚS. iii. 8.25; यजमानं वाचयेत्तन्तवे मा ज्योतिषेत्यसावनु मा तनुहि LāṭyāŚS. ii. 11. 3; DrāhyŚS. vi. 3.9; तस्मात् संजनयेत् कोशं संहृत्य परिपालयेत्। परिपाल्यानुगृह्णीयाद् (v.l. अनुतनुयाद्) एष धर्मः सनातनः MahāBhā. xii. 131.2.

अनुतन्त्र (anu-tantra) *n.* **1** subsidiary text which follows the basic text (i. e. Vārttika) नित्याः शब्दार्थसंबन्धास्तत्राम्नाता महर्षिभिः। सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः VākyaP. 1.23 (comm. अनुतन्त्रं वार्त्तिकम्); ततोऽत्र मूलतन्त्रस्य कर्ता पश्चिमतीर्थकृत् । गौतमश्चानुतन्त्रस्य MahāP. 1. 201; YaśasCam. ii. 35.5 (comm. अनुतन्त्रैः वार्त्तिकैः); **2** a particular kind of coitus प्रस्तुत्य ... दण्डप्रदानानुतन्त्रप्रवृत्ताः स्मरसूत्रविवरणवतीस्तास्ताः कथाः YaśasCam. ii. 35. 5 (comm. दानादनन्तरं अनुतन्त्रे पश्चात्सुरते प्रवृत्ताः)

अनुतन्त्रम् (anutantram) *adv.* in accordance with the normal procedure, in pursuance of the normal procedure अनुतन्त्रमुक्थप्रणयौ नाना षोडशिसामनी करोति NidāSū. 102.5 (6. 6); यज्ञसामान्यादहीनेभ्यः तत्र श्यैतमनुतन्त्रम् NidāSū. 104. 7 (6. 7); यान्यायुषः सामानि तानि सामानि, अनुतन्त्रं यान्यन्यानि पृष्ठानि NidāSū. 119. 24 (7. 4); अनुतन्त्रमुक्थप्रणयः NidāSū,